Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# रसानां अङ्गभावप्राप्तिर्हि स्वाभाविकी समारोपकृता वा



नर्मदा बेहेरा,
शोधछात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालय:तिरुपति:,
आन्ध्रप्रदेश,भारत।

**Article Info**
Volume 4, Issue 1
Page Number : 116-119
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 05 Feb 2021
Published : 15 Feb 2021

**सारांश:** –प्रबन्धो नीरसो भवति स कवे: महानपशब्दो भवति , येन स: अकवि: भूत्वा अन्येन अस्मृतलक्षण: सम्भवति। अत: रसविरोधपरिहारप्रसङ्गे अङ्गभावप्राप्तिर्हि तेषां स्वाभाविकी समारेपकृता वेति वृत्तिवाक्यं सर्वथा युक्तियुक्तं वर्त्तते।

मुख्यशब्द: – अकवि:, रस:, अंगभाव, समारोपकृता, परिहार: प्रबन्ध:।

**'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'।**

इति अग्निपुराणदिशा रस एवात्मा साररूपतया जीवनाधायको यस्य । तेन विना तस्य काव्यत्वाभावस्य प्रतिपादितत्वात्। अत: रसविरोधितत्वानां परिहार: कर्त्तव्य:। आदौ विरोधस्थलानि ज्ञातव्यानि।

**प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता।**
**यत्न: कार्य: सुमतिना परिहारे विरोधिनाम्।।**

प्रबन्धे- मुक्तककाव्येषु वा रसादीन् बन्धुमिच्छता रसानां विरोधिनां परिहारे यत्न: कार्य:। तानि विरोधस्थलानि –

**विरोधिरससम्बन्धिविभावादिपरिग्रह: ।**
**विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम्।**
**अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम्।**
**परिपोषं गतस्यापि पौन:पुन्येन दीपनम्।।**
**रसस्य स्याद्विरोधाय वृत्त्यनौचिन्त्यमेव च ।।** (ध्वन्यालोक-3/18)

रससम्बन्धिविरोधिविभावादिनां परिग्रह:, अन्यस्य वस्तुनो वर्णनम् अकाण्डे विच्छित्ति:, अकाण्डे प्रकाशनम्, रसस्य परिपोषणात्परं पौन:पुन्येन दीपनम्, वृत्त्यनौचित्यमिति एते रसविरोधस्थलानि भवन्ति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तत्र कविना प्रकृतरसं परिपोष्टुकामेन , तदभिव्यञ्जके काव्ये तद्विरुद्धरसाङ्गानां निबन्धनं न कार्यम्, तथाहि सति तदभिव्यक्तौ विरुद्धः प्रकृत बाधत्ते सुन्दोपसुन्देन्यायेन वोभयोरूपहतिः स्यात्। इति रसगङ्गाधरे पण्डितराजेन जगन्नाथेन प्रतिपादितम्।

काव्यप्रकाशेऽपि त्रयोदशरसविरोधिभावानां वर्णनम् एवं प्रदर्शितम्।

**व्याभिचारिरसस्थायीभावानां शब्दवाच्यता ।**

**कष्टकल्पनया व्यक्तिरनुभावविभावयोः।।**

**प्रतिकूलविभावादिग्रहो दीप्तः पुनः पुनः।**

**अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः।।**

**अङ्गिनोऽ ननुसन्धानं प्रकृतिनां विपर्ययः।।**

**अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः।।** (का.प्र.7/62)

ध्वन्यालोकस्य तृतीयोद्योते रसविरोधपरिहारसन्दर्भे सामान्योपायान् प्रतिपाद्य विशेषोपरिहारोपायेषु रसानाम् अङ्गभावप्राप्तिर्हि स्वाभाविकी समारोपकृता वेति अस्य विशेषरूपस्य प्रतिपादनं कृतम्। यथा-

**विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् ।**

**बाध्यनामङ्गभावं वा प्राप्तानामुक्तिरच्छला** ।। (ध्व.लो.-3/20)

तदयमभिप्रायः यत्र काव्ये विवक्षितः रसः स्व- सामग्री बलेन लब्धपरिपोषः तत्र विरोधिनां रसानां विरोधिरसाङ्गानां च अङ्गरूपेण वर्णने न दोषः। विरोधिनां बाध्यत्वं तदा भवति। यदा ते मुख्यरसद्वारा अभिभूताः भवन्ति। एतादृशबाध्यरसानाम् अङ्गभावेन वर्णने रसविरोधो न भवति इत्यर्थः तद्यथा-

**क्वाकार्यं शशलक्ष्मणः क्व च कूलं भूयोऽपि दृश्येत सा**

**दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम्।**

**किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा**

**चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं पास्यति।।**

क्वकार्यं कुत्र च शशलक्षणः कूलम् ? सा भूयोऽपि दृश्यते । मे शास्त्रं दोषाणां प्रशमाय भवेत्। कोपोऽपि कान्तं मुखम्। अपकल्मषाः कृतधियः किं वक्ष्यन्ति? सा स्वप्नेऽपि दुर्लभा । हे चेतः स्वास्थ्यमुपैहि , कः युवा धन्यो तस्याऽधरं पास्यति इति विक्रमोर्वशीये पुरूरवसः उक्तिः।

इत्यस्मिन् पद्ये विप्रलम्भश्रृङ्गाररसः विवक्षितः प्रधानत्त्वेन वर्त्तते। अत्र श्रृङ्गारविरोधिनः शान्तरसस्य व्यभिचारिणः वितर्कः, मतिः, शंका, धृतिश्च बाध्यरूपेण वर्णिताः। अतरत्र न दोषः तदुक्तं ध्वन्यालोके "अङ्गभावं प्राप्तानां च तेषां विरोधित्वमेव निवर्त्तते"। तत्र रसानां विरोधमात्रप्रदर्शनं दर्पणे यथा-

**आद्यः करूण – बीभत्स – रौद्र – वीर- भयानकैः**

**भयानकेन करुणे – नापि हास्यो विरोधभाक्।।**

**करुणो हास्यश्रृङ्गार – रसाभ्यामपि तादृशः ।**

**रौद्रस्तु हास्य – श्रृङ्गार- भयानकरसैरपि ।।**

**भयानकेन शान्तेन , तथा वीररसः स्मृतः।**

**श्रृङ्गार – वीर – रौद्राख्य- हास्य शान्तैर्भयानकः।।**

**शान्तस्तुवीर – श्रृङ्गार – रौद्र – हास्य – भयानकैः।**

**श्रृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ।। इति**

(साहित्य दर्पणम्)

विरोधिरसानां अङ्गभावप्राप्ति द्विधा सम्भवति। यथा स्वाभाविकी समारोपकृतावेति।

येषाम् अङ्गभावप्राप्तिः नैसर्गीकि तत्र अदोषो एव। यथा –

**भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादं।**

**मरणं च जलदभूजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्।।**

इत्यादि पद्ये शृङ्गार रसः प्रधानः। तत्र भ्रमिप्रभृतीनि शृङ्गारस्य विरोधिनाः करुणरसस्य अङ्गरूपेण प्रयुक्तानि सन्ति। अत्र विरोधिनः रसस्य अङ्गभावेन नैसर्गिकतया वर्णनात् न दोषः।

यद्यपि मरणमिति ब्यभिचारीभावः शृङ्गरे अङ्गरूपेण संभाव्यते, तथापि तद् वर्णनम् अनुचितम्। यतोहि शृङ्गाररसस्य आलम्बनयोः नायीकानायकयोः विच्छेदत्वात् रसस्यापि अत्यन्तविच्छेदो जायते। यत्र करुणरसः मुख्यत्वेन वर्ण्यते तत्र मरणवर्णने न दोषः। अतः रसबन्धप्रधानेन कविना यत्नपूर्वकम् एतत् परिहर्त्तब्यम्।

अङ्गभावप्राप्तिर्हि तेषां समारोपकृता वा भवितुमर्हति। अर्थात् रसाङ्गानाम् अङ्गभावप्राप्तिः समारोपकृता भवति चेदपि न विरोधः। यथा–

**पाण्डुक्षामं वक्त्रं हृदयं सरसं तवालसं च वपुः।**

**आवेदयति नितान्तं क्षेत्रियरोगं सखी कृदन्तः।।**

हे सखी तव पाण्डुक्षामं वक्त्रं, सरसं हृदयं, आलसं वपुः च कृदन्तः क्षेत्रियरोगं नितान्तम् आवेदयतीति भावार्थः।

अत्र करुणोचितो व्याधिः श्लेषभंग्या स्थापिरत्त्वात् न दोषः।

**"कोपात्कोमललोल**---------"

इत्यादि पद्ये कोप – बन्धनादयः रौद्ररसस्य अङ्गत्वात् श्रृङ्गारसस्य विरोधिनः, किन्तु कोमलबाहुलतायां पाशत्वस्य आरोपात् श्रृङ्गारस्य अङ्गत्वेन वर्त्तते अतो न दोषः।

**मुख्या व्यापारविषयाः सुकवीनां रसादयः।**

**तेषां निबन्धने भाव्ये तैः सदैवाप्रमादिभिः।।**

**नीरसस्तु प्रबन्धो यः सोपशब्दो महान् कवेः।**

**स तेनाकविरेव स्यादन्येनास्मृतलक्षणः।।**

अनेन ज्ञायते यत् – यदि प्रबन्धो नीरसो भवति स कवेः महानपशब्दो भवति , येन सः अकविः भूत्वा अन्येन अस्मृतलक्षणः सम्भवति। अतः रसविरोधपरिहारप्रसङ्गे अङ्गभावप्राप्तिर्हि तेषां स्वाभाविकी समारेपकृता वेति वृत्तिवाक्यं सर्वथा युक्तियुक्तं वर्त्तते।

**सहायक ग्रन्थसूची**

1.ध्वन्यालोकः । आनन्दवर्द्धनकृतः, चौखम्बा प्रकाशनम्। व्याख्याकारः- रामसागर त्रिपाठी।

2.रसगङ्गाधरः । पण्डितराजजगन्नाथकृतः, चौखम्बा प्रकाशनम्। व्याख्याकारः- पण्डित मदनमोहन झा।

3. काव्यप्रकाशः। मम्मटाचार्यकृतः, चौखम्बा प्रकाशनम्। व्याख्याकारः- 8 हरिशङ्कर शर्मा।

4. साहित्यदर्पणम्। विश्वनाथकविराजकृतः, चौखम्बा प्रकाशनम्। व्याख्याकारः – शेषराजशर्मा रेग्मी।